# Shri Vishnu Nirajanam

# શ્રીવિષ્ણુનીરાજનમ્

## Document Information

Text title : viShNunIrAjanam

File name : viShNunIrAjanam.itx

Category : vishhnu, AratI

Location : doc_vishhnu

Transliterated by : Venkata krishna T.

Proofread by : Venkata krishna T., NA

Latest update : February 17, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 18, 2022

*sanskritdocuments.org*

# Shri Vishnu Nirajanam

# શ્રીવિષ્ણુનીરાજનમ્

જય માધવ મધુસૂદન જય કરુણાસિન્ધો ।
જય ભવભીતિવિનાશન શરણાગતબન્ધો ॥

જય દેવ જય દેવ ॥ ૧॥

वन्दे કમલેશાનં વિનતાસુતયાનમ્ ।
જગદેકાન્તનિદાનં વાઞ્છિતવરદાનમ્ ॥

જય દેવ જય દેવ ॥ ૨॥

મુકુટવિભૂષિતભાલં શોભિતવનમાલમ્ ।
શ્યામલકુઞ્ચિતબાલં ત્રિભુવનજનપાલમ્ ॥

જય દેવ જય દેવ ॥ ૩॥

કટિતટપીતદુકૂલં વિશ્વવિટપમૂલમ્ ।
ભવસાગરજલકૂલં ભજતામનુકૂલમ્ ॥

જય દેવ જય દેવ ॥ ૪॥

સાગરજાપરિવારં કૌસ્તુભમણિહારમ્ ।
ક્ષીરામ્ભોધિવિહારં નિગમાગમસારમ્ ॥

જય દેવ જય દેવ ॥ ૫॥

શેષશરીરનિવાસં વિમલામ્બરભાસમ્ ।
શ્રીવૈકુણ્ઠવિલાસં દાનવકુલનાશમ્ ॥

જય દેવ જય દેવ ॥ ૬॥

શઙ્ખગદામ્બુજધારં ચતુર્ભુજાકારમ્ ।
વૃન્દારકહિતકારં ભવવારિધિપારમ્ ॥

જય દેવ જય દેવ ॥ ૭॥

કમલાશ્રિતવામાઙ્ગં ભૂષિતસકલાઙ્ગમ્ ।
સુન્દરકરુણાપાઙ્ગં મણિમઞ્જુવરાઙ્ગમ્ ॥

જય દેવ જય દેવ ॥ ૮॥

પાર્ષદપૂગસમેતં સુરગણસમવેતમ્ ।
બ્રહ્માનન્દનિકેતં મુનિજનસમુપેતમ્ ॥

જય દેવ જય દેવ ॥ ૯॥

હરિનીરાજનમેતત્પઠતિ નરો નિત્યમ્ ।
વિષ્ણોર્લોકમશોકં વ્રજતિ સ વૈ સત્યમ્ ॥

જય દેવ જય દેવ ॥ ૧૦॥

ઇતિ શ્રીબ્રહ્માનન્દસ્વામિવિરચિતં વિષ્ણુનીરાજનં સમાપ્તમ્ ॥

Encoded and proofread by Venkata krishna T.

---

*Shri Vishnu Nirajanam*

pdf was typeset on February 18, 2022

Please send corrections to *sanskrit@cheerful.com*